नवमः पाठः। सूक्तिसुधा। (कण्ठस्थीकरणार्थम्)

संस्कृतभाषा सुभाषितैः समलङ्कृता खलु। सुभाषितेभ्यः उद्धृताः नैकविधाः संस्कृतसूक्तयः न केवलं संस्कृते, अपि तु अन्यभाषास्वपि मार्मिकतया उत्स्फूर्ततया च उपयुक्ताः दृश्यन्ते। प्रायः जनाः सम्पूर्णं सुभाषितं न स्मरन्ति परन्तु सूक्तयः तेषां जिह्वाग्रे तिष्ठन्ति। भाषावैभवं वर्धयन्त्यः एतादृश्यः सूक्तयः छात्रैः सम्यक् पठितव्याः स्मर्तव्याः च।

न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥१॥

[विद्याधनं चोरहार्यं न (अस्ति), राजहार्यं न, भ्रातृभाज्यं न, भारकारि (अपि) न (अस्ति)। व्यये कृते अपि (तत्) नित्यं वर्धते एव। (सत्यमेव विद्याधनं) सर्वधनप्रधानम् (अस्ति)।]

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥२॥

[लघुचेतसां (कृते) अयं निजः परः वा इति गणना (अस्ति)। उदारचरितानां (कृते) तु वसुधा एव कुटुम्बकम् (अस्ति)।]

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥३॥

[वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। इदं शरीरं परोपकारार्थम् (एव अस्ति)।]

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चित्तं प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥४॥

[सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं तनोति। कथय! (सा सत्सङ्गतिः) पुंसां किं (हितं) न करोति ?]

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥५॥

[यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)।]

चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता॥६॥

[(यदा) चातकः पिपासया जलधरं त्रिचतुरान् पयःकणान् याचते (तदा) सः (मेघः) अपि विश्वम् अम्भसा पूरयति। हन्त हन्त (कियती एषा) महताम् उदारता !]

ते शतं हि वयं पञ्च स्वकीये विग्रहे सति।
परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम्॥७॥

[युधिष्ठिरः वदति – स्वकीये विग्रहे सति ते शतं वयं हि पञ्च (स्मः)। परैः विग्रहे प्राप्ते तु वयं पञ्चाधिकं शतं (स्मः)।]

पठकः पाठकश्चैव ये चान्ये शास्त्रवाचकाः।
सर्वे व्यसनिनो ज्ञेया यः क्रियावान्स पण्डितः॥८॥

[पठकः पाठकः (तथा) च ये अन्ये शास्त्रवाचकाः (सन्ति, ते) सर्वे व्यसनिनः ज्ञेयाः। (यतः) यः क्रियावान् सः (एव) पण्डितः (अस्ति)।]

भाषाभ्यास:

श्लोक: १

१. एकवाक्येन उत्तरत।

अ) कै: धनं न ह्रियते ?

आ) केषु धनं न विभज्यते ?

इ) सर्वधनप्रधानं किम् ?

२. माध्यमभाषया उत्तरत।

विद्याधनं व्यये कृते कथं वर्धते ?

३. सन्धिविग्रहं कुरुत। वर्धत एव।

४. समानार्थकशब्दं लिखत।

चोर:, भार:, नित्यम्, विद्या, धनम्, प्रधानम्।

५. विरुद्धार्थकशब्दं लिखत।

व्यय:, नित्यम्, प्रधानम्।

श्लोक: २

१. सन्धिं कुरुत।

(अ) पर: + वा + इति (आ) वसुधा + एव

२. एकवाक्येन उत्तरत।

अ) 'अयं निज:, अयं पर:' इति केषां गणना ?

आ) केषां कृते वसुधा एव कुटुम्बकम् भवति?

३. माध्यमभाषया उत्तरत।

लघुचेतस: उदारचेतस: जना: कथम् अभिज्ञातव्या: ?

४. स्तम्भमेलनं कुरुत

अ	स्वीयम्	चिन्तनम्	अन्य:	पृथिवी
आ	गणना	वसुधा	निज:	पर:

श्लोक: ३

१. एकवाक्येन उत्तरत।

अ) परोपकाराय वृक्षा: किं कुर्वन्ति ?

आ) परोपकाराय नद्य: किं कुर्वन्ति ?

इ) का: परोपकाराय दुहन्ति ?

ई) शरीरं किमर्थम् ?

२. माध्यमभाषया उत्तरत।

परोपकार: नाम किम् ? के परोपकारमग्ना: ?

३. एकवचने परिवर्तयत।

अ) वृक्षा: फलन्ति। आ) नद्य: वहन्ति।

४. समानार्थकशब्दं लिखत।

वृक्षा:, नद्य:, शरीरम्।

५. विरुद्धार्थकशब्दं लिखत। उपकार:, पर:।

श्लोक: ४

१. रिक्तस्थानं पूरयत।

अ) सत्सङ्गति: धिय: जाड्यं _____।

आ) सत्सङ्गति: वाचि _____ सिञ्चति।

इ) सत्सङ्गति: _____ दिशति।

ई) सत्सङ्गति: पापम् _____।

उ) सत्सङ्गति: चित्तं _____।

ऊ) सत्सङ्गति: दिक्षु _____ तनोति।

२. माध्यमभाषया उत्तरत।

सत्सङ्गति: जीवने किं किं करोति?

श्लोक: ५

१. सन्धिविग्रहं कुरुत।

नार्यस्तु, यत्रैता:, एतास्तु, तत्राफला:, सर्वास्तत्र।

२. एकवाक्येन उत्तरत।

अ) देवता: कुत्र रमन्ते ?

आ) क्रिया: कुत्र अफला: भवन्ति ?

३. माध्यमभाषया उत्तरत।

'यत्र नार्य: पूज्यन्ते'। इति सूक्तिं श्लोकस्य आधारेण स्पष्टीकुरुत।

४. एकवचने परिवर्तयत।

अ) नार्य: पूज्यन्ते। आ) देवता: रमन्ते।

इ) एता: न पूज्यन्ते। ई) सर्वा: क्रिया: अफला:।

५. 'नारी' इत्यर्थम् अमरकोषपङ्क्तिं लिखत।

श्लोक: ६

१. सन्धिविग्रहं कुरुत।

अ) चातक: + _____= चातकस्त्रिचतुरान्।

आ) सोऽपि = _____ + अपि।

इ) विश्वम् + अम्भसा = _____।

ई) महताम् + _____ = महतामुदारता।

२. एकवाक्येन उत्तरत।

अ) चातक: पय:कणान् कं याचते ?

आ) जलधर: केवलं चातकस्य तृष्णां शाम्यति उत सम्पूर्णविश्वस्य ?

इ) महताम् उदारता कस्य दृष्टान्तेन ज्ञायते ?

३. माध्यमभाषया उत्तरत।

महताम् उदारता श्लोके कथं वर्णिता ?

४. रूपपरिचयं कुरुत।

अम्भसा, महताम्, पिपासया, पय:

५. समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत।

चातक: पयस: कणान् जलधरं याचते।

६. अमरकोषपङ्क्तिं लिखत। जलधर:, अम्भ:

श्लोक: ७

१. माध्यमभाषया उत्तरत।

'वयं पञ्चाधिकं शतम्' इति सूक्तिं स्पष्टीकुरुत।

२. श्लोकात् सप्तम्यन्तपदानि चिनुत लिखत च।

३. श्लोकात् सङ्ख्यावाचकानि चिनुत लिखत च।

श्लोक: ८

१. सन्धिविग्रहं कुरुत।

अ) पाठकश्चैव = _____ + च + _____।

आ) चान्ये = _____ + अन्ये।

इ) व्यसनिनो ज्ञेया: = _____ + ज्ञेया:।

ई) क्रियावान्स पण्डित: = क्रियावान् + _____ + पण्डित:।

२. एकवाक्येन उत्तरत।

अ) के व्यसनिन: उक्ता: ?

आ) क: पण्डित: उच्यते ?

३. माध्यमभाषया उत्तरत।

पाण्डित्यं कस्मिन् वर्तते ? यथार्थ: पण्डित: क: ?

४. सुभाषितात् समानार्थकशब्दं लिखत।

वाचक:, अध्यापक:, शास्त्रविद:, कार्यकर्ता, विद्वान्, बोद्धव्या:।

पठत अवगच्छत ! **विसर्गसन्धि:**

विश्वं विसर्गस्य।



रम्यसंस्कृतम्। सङ्ख्याविशेषणानि – २।

संवादम् इमं पठत।

मातामही – एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि अधीतानि खलु ?

पञ्चत: तु सङ्ख्यारूपेषु न लिङ्गभेद:। ता: यथावत् प्रयोक्तव्या:।

वेणु: – ज्ञातम्। तर्हि पञ्च आसन्दा:, पञ्च अङ्कन्य: पञ्च भवनानि वा।

सुधेन्दु: – तथा च सप्त बटव:, सप्त रज्जव:, सप्तैव च दिनानि।

पृथा – इतोऽपि अष्ट तारका:, अष्ट मुनय:, अष्ट वसूनि।

मातामही – उत्तमम्। काश्चन सङ्ख्या: प्रसिद्धा:। यथा नव रात्रय: ...

वेणु: च पृथा च – सप्त ऋषय:, दश आननानि, अष्ट लक्ष्म्य:... त्रीणि भुवनानि, नव रत्नानि वा।

मातामही – पर्याप्तम्। अहम् अधुना कूटप्रश्नं वदामि। **भि: – भ्य: – भ्य: – आनाम् – सु।** किम् एतद् ?

सुधेन्दु:– (उच्चै: हसित्वा) न एष: कूटप्रश्न:। एते तु विभक्तिप्रत्यया:। गतवर्षे अहं पठितवान् सम्यक् स्मरामि अधुना अपि।

वेणु: – ओहो सुधेन्दो ! सत्यमेव तीक्ष्णा जाता तव बुद्धि:। तर्हि एते सङ्ख्याप्रत्यया: तृतीयात: सप्तमीपर्यन्तम्।

पृथा– यथा – **पञ्च, पञ्च, पञ्चभि:, पञ्चभ्य:, पञ्चभ्य:, पञ्चानाम्, पञ्चसु**। पञ्चत: नवदशपर्यन्तं रूपाणि पञ्च सङ्ख्या इव भवन्ति। सत्यं खलु ?

मातामही – आम्, अतीव मुदिताऽस्मि। यूयं सर्वे संस्कृतपटव:। इत:परं संस्कृतभाषया खेलितुं समर्था:।

सुधेन्दु:– तत्तु त्वया सह सम्भाषणेन किञ्चिद् व्याकरणाभ्यासेन च।

वेणु: – सङ्ख्यारूपाणि सम्यगधीत्य सम्भाषणे सङ्ख्यानाम् अधिकं प्रयोगं कुर्म:।

पृथा – अग्रिमे अवकाशे अन्यान् सङ्ख्याविशेषान् ज्ञातुम् आगच्छाम:।

CJN8GB

जिज्ञासापत्रम्

सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

१. तत्र _____ (५) बालकेषु कलह: उद्भूत:।

२. _____ (६) बिडालै: एक: एव मूषक: दृष्ट:।

३. _____ (७) दीपानाम् एका आवलि: गृहे दृश्यते।

४. _____ (९) रात्रीणां समूह: नाम नवरात्रम्।

५. अपि जानासि _____ (७) ऋषीणां नामानि ?

६. कार्तिकेय: _____ (६) मुखै: वदति किम् ?

७. रावणस्य _____(१०)मस्तकेभ्य: किरीटा: पतिता:।

८. _____ (८) लक्ष्मीषु कति नामानि जानासि ?

९. राजा _____ (९) ऋषिभ्य: दानं दत्तवान्।

१०._____ (६) वस्तुभ्य: _____ (३) वस्तूनि आवश्यकानि।

११.अस्माभि: _____ (८) भूपतीनां चरित्राणि पठितानि।

सङ्ख्यारूपाणि

(नित्यं बहुवचनम्)			
षष्	**अष्टन्**	**नवन्**	**विभक्ति:**
षट्/षड्	अष्ट / अष्टौ	नव	प्रथमा
षट्/षड्	अष्ट / अष्टौ	नव	द्वितीया
षड्भि:	अष्टभि:/ अष्टाभि:	नवभि:	तृतीया
षड्भ्य:	अष्टभ्य:/ अष्टाभ्य:	नवभ्य:	चतुर्थी
षड्भ्य:	अष्टभ्य:/ अष्टाभ्य:	नवभ्य:	पञ्चमी
षण्णाम्	अष्टानाम्	नवानाम्	षष्ठी
षट्सु/ षट्त्सु	अष्टसु/ अष्टासु	नवसु	सप्तमी